International Journal of Sanskrit Research 2018; 4(1): 112-113

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 112-113
© 2018 IJSR
www.anantaajournal.com
Received: 20-11-2017
Accepted: 26-12-2017

**डॉ० किरण कुमारी**
पत्रालयश्च–उझटी, बिरौलः,
दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० किरण कुमारी**
पत्रालयश्च–उझटी, बिरौलः,
दरभंगा, बिहार, भारत

# समाजे धर्मस्योपकारकत्व–विमर्शः

## डॉ० किरण कुमारी

**सारांश**
''धर्मो विश्वस्य जगतः प्रतिष्ठा'' अपिच ''चोदनालक्षणोऽर्थो धर्मः'' चोदना नाम वेदप्रतिष्ठितमन्त्रैः प्रतिपाद्यमाना विधिरूपा प्रेरणैव। धर्मस्य प्रतिपादकत्वं नाम वेदे एक मुख्यतया उपयुज्यते। अत एव वेदस्याकुण्डितां शक्ति सम्प्रादायविदो दर्शयन्ति। तथा च शाबरभाष्ये ''चोदना हि भूतं भवन्तं भविष्यतं सूक्ष्म व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थ शक्नोत्यवगमयितुम'' इति।

**धर्मस्य लक्षणम्–**
'यतोऽभ्युदयनिः श्रेयससिद्धिः स धर्मः। श्रुत्या यानि कर्माणि विधिरूपेण विहितानि, तानि धर्म इति कथ्यन्ते। यानि च कर्माणि निषिध्यन्ते श्रृत्या, तानि अधर्म इति मन्यन्ते, धर्माधर्मव्यवस्था वेदस्य परम प्रामाण्यात्। तथा च श्रीमद्भागवते व्यासस्य गम्भीरार्थप्रतिपादकं वचनम् मनुना धृतिः क्षमादयो दश गुणा एव धर्मशब्दवाच्यत्वेन निर्दिष्टाः । यथा –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। [1]

अपि च –
वेदः स्मृतिः सदाचरः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम् ।। [2]

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।
वेदो नारायणः साक्षात् स्त्रायम्भूरिति शुश्रुम।। [3]

भगवत्प्रणीतत्वेन धर्मस्य ज्ञाता बोद्धा च भगवानेक एव, न ऋषया, ना वा देवा, न वा सिद्धाः कुतो मनुष्या विद्याधरचारणादय इति प्रतिपादितं श्रीमद्भागवते–

धर्म तु साक्षाद् भगवत्प्रणीतं
न वै विदुर्ऋषयो नापि देवाः।
न सिद्धमुख्या असुरा मनुष्याः
कुतश्च विद्याधरचारणादयः।। [4]

धर्मस्याश्रयणेनैव इहलोके प्राणिनामभ्युदयः स×जायते, अमुष्मिन् लोके निःश्रेयसरूपा मुक्तिश्चोपलभ्यते। धर्मस्य धारकत्वं श्रीवेदव्यासो नानावचनैर्महाभारते प्रतिपादयति–

धारणाद् धर्म इत्याहुर्धर्मेण विधृताः प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः।। [5]

**धर्मस्य वैशिष्टयम्–**
अधिकारिभेदस्वीकरणं प्रथमं तावद् वैशिष्टद्यं धर्मस्य मानवानां 'बुद्धिस्वभवादीनां नितान्तं भिन्नत्वात्। न हि सर्व एव मानवा एकस्यैव धर्मोपदेशस्यानुकुल्यं भजन्ते। योग्यतामनुसृत्य निर्दिष्टो हि धर्मः सर्वदा हितावहः श्रेयष्करश्च भवति।

न हि मनुजाः समानयोग्यताभाजोऽवलोक्यन्ते, सत्त्वादीनां च तत्स्थानां गुणानां तत्रा तत्रा परस्परमुपचयापचयत्वेन तेषां मानसवृत्तीनामनेकरूपत्वात्।
कर्मसिद्धान्तस्वीकारश्च द्वितीयं वैशिष्ट्यम्। लोकेऽस्मिन् प्रत्यह मनुभूयमानदशावैषम्यस्यानेनैव सिद्धान्तेन साम×जस्यं घटते। केचन आढ़याः सुखनैव स्वं कालं यापयन्तिः अपरे च हीनाः क्लेशेनैव स्वयं समयं नयन्ति। को हेतुरस्य दशावैषम्यस्य? न हि सर्वेषां जनके परमेश्वरे नैर्घृण्यं कल्पयितुं पार्यतेः प्राणिनां कर्मानुकूल्यादेव दशाविपर्ययस्य विनिश्चेतुं सुशकत्वात्। वैशिष्ट्यद्वयसमाश्रयणे हि सर्वासां समस्यानां समाधानं कर्तु पार्यते विद्वज्जनैः। अन्येषु मतेष्वधिकारिभेदस्वीकरणाभावात् समान एवोपदेशस्तन्मतानुयायिनां निखिलानामुपयोगाय विधीयते। एष तु नितान्तमनौचित्यं भजते। न हि सर्व एवम् तन्मतावलम्बिनः समानबुद्धिवैभवशीला विलोक्यन्ते, येनोपदेशस्य सामान्यरूपमङ्गीक्रियेत। कर्मसिद्धान्तस्वीकाराभावे विश्वस्मिन् प्रत्यहं प्रतिक्षणं चानुभूयमानो व्यवहारभेदो न कथमपि सत्तर्केण समर्थयितुं पार्यते। अत एव वेदप्रतिपाद्यधर्मस्य माहात्म्यं विद्वज्जनैरूररीकरणीयमेवेति, धर्मोपदेशविषयेऽधिकारिभेदस्वीकरणात् कर्मसिद्धान्तसमर्थनाच्चेति दिक्।
धर्मस्त्वेक एव। स च चोदनाप्रतिपाद्यो वैदिको धर्मः। अन्ये तु धर्म शब्देन प्रायशो व्यपदिश्यमाना अपि सम्प्रदाया एव। सम+प्रोपसर्गाभ्यां युक्तस्य दाधातोः 'आतो युक् चिण्कृतोः [6] इति सूत्रोण ध×् प्रत्यययोगेन निष्पन्नोऽयं 'सम्प्रदाय' शब्दो गुरूपरम्परागतं सदुपदेशं शिष्ट प रम्परावतीर्णोपदेशं च सम्यग् व्यनक्ति। तथा च महाकविना माधेन 'सम्प्रदाय' शब्दोऽयं सुष्ठु प्रायोज्येतस्मिन् पद्ये–

सम्प्रदायविगमादुपेयुषी–
रेष नाशमविनाशि विग्रहः।
स्मर्तप्रतिहतस्मृतिः श्रुती–
र्दत्त इत्यभवदत्रिागोत्राजः।। [7]

एवं च केनापि विशेषगुणगौरवशालिना आचार्येण कालिक–दैशिकदशामनुरूध्य कस्मिन्नपि विशिष्टे भूभागे क्रियमाणः सदुपदेशः सम्प्रदायशब्देन व्यवहि्रयते विद्वद्भिः। सार्वभौमत्वं सार्वकालिकत्वं चाद्वितीयत्वं च यथा धर्मस्य द्योतकं तत्त्वम्, तथैव देशकालसम्बन्धतः कादाचित्कत्वमनुभूयमानत्वं सम्प्रदायस्येति तयोः पार्थक्यरेखाविभागः। 'रिलीजन' शब्दः सम्प्रदायमेव स्ववाच्यत्वेनाभिधत्ते। सम्प्रदायेष्वेव हिब्रूखिष्टीय–मोहम्मदीयादीनि विश्रुतानि धार्मिकमतान्यन्तर्भवन्तीति सुधोभिनिभालनीयम्। त एतेऽनेकसम्प्रदायाः सनातनवैदिकधर्मस्यैवाङ्गभूताः।, तद्विवृतैकदेशस्यैव प्राधान्येनोपदेशकरणात्। भ्रातृभावः, परस्परं मैत्रीभावना, प्राणिनां परस्पर–प्रमानुबन्धिनी सेवा–इत्यादयो निखिलमतेषूपलभ्यमाना धर्मगुणाः सनातनधर्मस्यैवाङ्गभूताः। एते सम्प्रदाया अपि परमपुरूषार्थभूतमोक्षस्य साधकत्वेन यदि धर्मशब्देन लोके व्यवहि्रयन्ते, तत्तूपलक्षण मात्राम्। परम्परया मोक्षसाधकत्वात् तेषु धर्मशब्दो ह्य पचरित वृत्तिर्द्रष्टव्यः।
वैदिकधर्म एव विश्वेषामपि मतानां सम्प्रदायानां च जनकः। सत्यास्तेयशौचादीनां सदाचारस्याङ्गानामुपलब्धिरेव नैतसित्सद्धान्तस्वीकरणे हेतुरूपतामाधत्ते, अपि तु तत्स्वीकृतपरमेश्वरस्याभिधानमपि वेदादेव गृहीतमिति तुलनात्मकभाषाविज्ञानपद्धतिमनुरूद्धय ध्रुवं सत्यापयितुं पारयामः। तथा च हिब्रू मते यस्य प्रतिपादनम्, ओल्ड टेस्टामेण्ट'नाम्ना प्रख्यातस्य बाइबिलगन्थस्याऽऽदिमो भागो विशदं विद्यते। परमेश्वरस्य 'यहोवाव'– 'यश्हं' यश्' इत्यादिविधाकारैः समुदीर्यमाणमभिधानं वेदेषु देववाचक–यह्' नामैव सर्वात्मना अनुसरतीर्ति भाषासमीक्षणसिद्धातः। 'यहृ' शब्दस्य प्रयोग ऋग्वेदीयविविधमन्त्रोषूपलभ्यते–

विश्पतिं यश्मतिथिं नरः। [8]
प्र वो यश्रं पुरूणां विशां वेदयतीनाम्।
अग्नि सूक्तेभिर्वचोभिरीमहे यं सीमिदन्यः इष्ठते।। [9]

**निष्कर्षः**
वैदिकोऽयं 'यहृ' शब्दो निघण्टौ महन्नामसु पठितो महदित्यर्थ सूचयति। 'यह्' इति महतो नामधेयम्। ''यातश्च हूतश्च भवति' इति निरूक्तं तदेव समर्थयति। 'या' 'हे्' इति धातुद्वयसंयोगात् 'गेहे कः' इति सूत्रोण बाहुलकाद् भूते कप्रत्ययो हृयतेः सम्प्रसारणभावश्चेति वदति स्कन्दस्वामी। यातश्चासौ प्रार्थिभिर्हूतश्चेति तदर्थः। तथा च याजकैर्देवोऽयं सर्वथा गम्यते प्रार्थनास्वीकरणार्थ च बहुशो हृयत इति महत्त्वावच्छिन्नता तस्मिन् ध्रुवं जागर्ति।

**संदर्भाः**

1. मनुस्मृतिः–4/204/ ।
2. तत्रौव – 2–12।
3. भागवते – 6/3/19।
4. तत्रौव – 6/3/19।
5. महाभारत शान्ति प0 – 10/9/11।
6. पाणिनिसूत्राम् – 7/3/33।
7. शिशुपालबधे, 14/79।
8. ऋग्वेदः 3/3/8।
9. ऋक्0 1/3/6/1।